INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN : 2277-7881
VOLUME 1, ISSUE 4, SEPT 2012

# मुखं व्याकरणं स्मृतम् – तत्र पाणिनीयव्याकरणवैशिष्ट्यम्

**Dr. P. Swapna Haindavee,** M.A., Ph.D.,

Principal (FAC),

M.R.Govt. Sanskrit College, Vizianagaram

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

इत्थं निखिलेऽपि संस्कृतवाङ्मये राराज्यते व्याकरणस्य महत्त्वम् । यथा आयुर्वेदे विभिन्नरोगाणां निवारणोपायाः चिन्तिताः । नास्ति मूलमनौषधमिति कथनानुसारं प्रत्येकमपि प्रकृतिजातस्य उपयोगिताम् अनुसन्धाय कस्मै रोगाय किमौषधमिति सुश्रुतचरकवाग्भट्टप्रभृतिभिः आचार्यैः स्वीयस्वीयग्रन्थेषु उपनिबद्धम् । एवमेव शिक्षाग्रन्थेषु वर्णानाम् उत्पत्तिस्थानानां विषये वर्णितम् । कस्य वर्णस्य उत्पत्तौ वायुः किं स्थानम् आहन्ति तदेव उच्चारणस्थानं तद्वर्णस्येति सूक्ष्मालोचनेन बहुयत्नेन वैज्ञानिकरीत्या शिक्षाग्रन्थेषु उक्तं तच्च अद्य नास्तिकवैज्ञानिकैरपि अङ्गीक्रियते । दर्शनशास्त्रेष्वपि बहुधा आलोच्य संसारे वर्तमानां पदार्थानां वर्गीकरणं कृतम् । यथा न्यायशास्त्रे महर्षिणा गौतमेन षोडशपदार्थाः उक्ताः । इतोऽपि संक्षिप्य वैशेषिकदर्शने महर्षिकणादेन सप्तैव पदार्थाः इत्युक्तम् । तत्र षोडशपदार्थामन्तर्भावः सप्तस्वेव कृतः । सृष्टेः आरम्भः कथञ्जातः इति सर्वेषु दर्शनेषु किञ्चिन्मात्रभेदेन प्रतिपादितम् । किं बहुना, ज्योतिषशास्त्रे तु परोक्षाणामपि सूर्यादिनवग्रहाणां सप्तविंशतिनक्षत्राणां राशीनां स्थानं वर्तमानस्थितिश्च निर्दिश्यते। एवमेव सर्वेष्वपि शास्त्रेषु अनुसन्धानमेव वर्तते येन अतिसूक्ष्मा अपि विषयाः अस्माकं दृष्टिपथे आगताः । तथैव व्याकरणे शब्दसाधुत्वविवेचनपूर्वकं समग्रायाः संस्कृतभाषायाः साधुत्वसंरक्षणं विहितम् ।

शब्दाः व्यवहारसाधनाः भवन्ति । शब्दमन्तरेण लोकस्य स्थितिः कल्पयितुमपि न शक्यते । शब्दानाम् उत्पत्तिः कस्माज्जाता इति कथमपि निश्चेतुं नैव शक्यते । यथा वेदः अनादिः तथैव शब्दोऽपि अनादिरेव । शब्दानां साकल्येन ज्ञानाय शास्त्रेषु महान् प्रयत्नः कृतः । सः प्रयत्नः व्याकरणे निरुक्ते च दृश्यते। तत्रापि निरुक्तं वैदिकशब्दानामेव केषाञ्चन निष्पत्तिं करोति । किञ्च निरुक्तं व्याकरणस्यापि विकसितरूपं वर्तते । अतः साकल्येन शब्दज्ञानाय तु व्याकरणमेव धुरिकीर्तनीयं वर्तते ।

किन्तु शब्दानां ज्ञानाय को मार्गः आश्रयणीयः इति महानयं प्रश्नः आसीत् । किं शब्दानां प्रतिपदपाठः कर्त्तव्यो वा अन्य एव पन्थाः वा आविष्करणीयः इति । प्रतिपदपाठस्य विषये महाभाष्ये तावदुच्यते - **बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रोवाच । नान्तं जगाम । बृहस्पतिर्वक्ता । इन्द्रचाध्येता । दिव्यं वर्षसहस्रम् अध्ययनकालः नान्तं जगाम** इति दिव्यकालेऽपि इन्द्रेण शब्दानां प्रतिपदपाठः न समाप्तः, किं तर्हि अद्यत्वे अल्पीयसि आयुषि । अतः कश्चित् अन्य एव पन्थाः अनुसन्धेयः शब्दज्ञानाय इति आलोच्य प्राचीनाचार्यैः बहूनि व्याकरणानि कथितानि । साम्प्रतं नवविधव्याकरणानि प्रसिद्धानि दृश्यन्ते ।

तद्यथा -

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥**

सर्वस्मिन्नपि व्याकरणे शब्दसाधनाय प्रयत्नो विहितः । किन्तु पाणिनीयशास्त्रस्येदं महत्त्वं यदत्र अविशेषेण सर्वेषामपि लौकिकवैदिकशब्दानां निर्वचनं कृतम् । अत एव पाणिनेरेव व्याकरणं प्रसिद्धिमगात्। अत एव अस्मिन्नेव व्याकरणे बहवो वृत्तिग्रन्थाः, बहूनि वार्तिकानि, महाभाष्यञ्च दृश्यन्ते ।

शब्दाः अनन्ताः । पुनश्च द्विविधाः लौकिका वैदिकाश्च । अत्रेदं चिन्तनीयं कथं वा अनन्तानां शब्दानां निर्वचनं कर्तुं शक्यते । अत एव पाणिनेः विषये वृद्धिसूत्रभाष्ये उच्यते - **प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म** इति ।

पाणिनिरत्र उत्सर्गापवादयोः माध्यमेन शब्दान् साधयति । उत्सर्गो नाम सामान्यकार्यम् । यथा तस्यापत्यम् इति सूत्रविहितः अण् सर्वेभ्योऽपि प्रातिपदिकेभ्य अपत्यार्थे प्राप्नोति । किन्तु यत्र विशेषप्रत्ययः क्वचिन्निर्दिष्टः तर्हि अणं बाधित्वा स एव विधीयते । इतोऽपि तिङन्तप्रक्रियायाः साधने पाणिनेः अत्यन्तवैशिष्ट्यं परिलक्ष्यते । प्रत्ययास्तु समाना एव । किन्तु कीदृशे प्रत्यये परे अङ्गस्य किं कार्यं करणीयमिति सारल्येन विज्ञातुं पाणिनिना अङ्गानां विभागः कृतः । अदन्तम् इदन्तम् उदन्तम् ऋदन्तम् एजन्तम् इति अजन्ताङ्गानां विभागः । अदुपधम् इदुपधम् उदुपधम् इत्यादिरीत्या हलन्ताङ्गानां विभागः । एवं विभागं विधाय तदनुसारमेव च कार्यं दृश्यते । कानिचन विशेषाङ्गानि यानि तासां कृते विशेषकार्याण्यपि निर्दिष्टानि । एवं रीत्या तिङन्तप्रक्रिया अपि सारल्येन सङ्कलिता पाणिनिदृष्ट्या । इदं सर्वं मनसि कृत्वैव पाणिनिना व्यवस्थितरूपेण सूत्राणि रचितानि ।

अध्येत्रा विशेषसामान्ययोः विषये विज्ञाय विशेषातिरिक्तस्थाने सामान्यमेव कार्यं प्रवर्तनीयम् इति पाणिनेः चिन्तनम् । पुनश्च कस्यापि सूत्रस्य शास्त्रे अन्यत्र केनापि सूत्रेण सह विरोधो न स्यात् इति आलोचनीयम् । यदि तु विरोधो भवति तर्हि तत्र किमपि ज्ञापयति पाणिनिः इति स्वविवेकेन निश्चेयम् । यतोहि वृद्धिसूत्रभाष्ये भाष्यकारो ब्रवीति **अत्राशक्यं वर्णेनाप्यनर्थकेन भवितव्यं किं पुनरियता सूत्रेण** इति । पाणिनिः अनुवृत्यधिकारसंज्ञापरिभाषादीनाम् उपयोगं कृत्वा अल्पाक्षरे: महतः विषयान् कथयति । इयञ्च रीतिः अद्यत्वेऽपि वैज्ञानिकानां मनसि आश्चर्यं जनयति ।

एवमेव पाणिनेः सूत्रपाठे अत्यन्तसूक्ष्मम् आलोचनं दृश्यते । पाणिनिना तु सूत्रेषु महान्तः निगूढविषयाः अन्तर्निधापिताः । तान् विषयान् भाष्यकारः अष्टाध्याय्याः अनुसन्धानेन प्रकटीचकार । भाष्यादेव वस्तुतः पाणिनेः वैशिष्ट्यम् अवगम्यते । तत्र च भाष्यकारस्य उदाहरणैः भाष्यकारस्यापि भाषाविषयकज्ञानं परिलक्ष्यते । भाष्यकारेण सूत्रपाठस्य निगूढानि तथ्यानि प्रत्यक्षीकृतानि । यथा ऋषिभिः

वेदमन्त्राः दृष्टास्तथैव भगवता पतञ्जलिना सूत्रपाठस्य अतिसूक्ष्माः अंशाः मथितक्षीरसागरात् अमूल्यरत्नानीव प्रकटिताः। पाणिनिना न प्रत्यक्षरूपेण सर्वमपि ज्ञानं सूत्रेषूक्तम्।

क्वचित् स्वीयनिर्देशेन किमपि प्रमाणयति, क्वचित् परिभाषां ज्ञापयति च। भाष्ये एव एते विषयाः सङ्कलिताः दृश्यन्ते। भाष्यकारस्य च वैशिष्ट्यमिदमपि दृश्यते यत् भाष्ये सिद्धान्तानां व्यवस्थापनाय लौकिकन्यायानां प्रयोगो बहुधा क्रियते भाष्ये। अत उक्तं तत्रैवम् **"नहीदं लोकात भिद्यते। यदीदं लोकाद् भिद्यते ततो यत्नार्हं स्यात्** इति। अत एव भाष्ये प्रासादवासिन्यायः तक्रकौण्डिन्यन्यायः इत्येवमादयो लौकिकन्यायाः स्वसिद्धान्तव्यवस्थापनाय दृश्यन्ते। एतेन लोकशास्त्रयोः तुलनात्मकमनुसन्धानं भाष्यकृतो ज्ञायते।

व्याकरणस्य अद्यत्वे भागद्वयं वर्तते प्रक्रियाभागः शाब्दबोधविषयकविचारश्च। भष्यकारैः उभयथा सूत्रपाठः आलोचितः। भाष्येऽपि केचन विचाराः न प्रत्यक्षरूपेण कथिताः। किन्तु स्वीयसूत्रसाधितवचनैः ज्ञापिताः। तच्च भाष्यकृतो ज्ञापनं नवीनाचार्यैः भट्टोजिदीक्षितनागेशप्रभृतिभिः ज्ञाताः। यथा भाष्यकारेण सूत्रपाठस्य अनुसन्धानं कृतं तथैव एतैः नवीनैः भाष्यमनुसन्धाय अनेके सिद्धान्ताः कथिताः। काशिकावृत्तौ वामनजयादित्याभ्यां सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन च सूत्रस्य सकलं भाष्यम् अधीत्य अल्पाक्षरैः सूत्रार्थाः सङ्कलिताः। भाष्ये एकस्य सूत्रस्य विषये ये ये पक्षाः सम्भवन्ति ते सर्वेऽपि पक्षाः आलोच्य अन्ते सिद्धान्ताः उक्ताः। तच्च भाष्यं सम्यक् विज्ञाय अनेकग्रन्थकारैः टीकाकारैश्च व्याख्यानानि कृतानि।

यथा भाष्यकारस्य क्रियावचनाः भ्वादयः इति उक्त्या वैयाकरणानां मते व्यापारः धात्वर्थो इति सिद्धान्तितम्। एतेन च दर्शनान्तरीयाणां मतस्य निराकरणं भवति। इत्थमेव भाष्यकारस्य वचनानि स्वीकृत्यापि नवीनैः भाष्यसम्मताः तथात्वात् पाणिनिसम्मताश्च शास्त्रीयसिद्धान्ताः कथिताः स्वीयग्रन्थेषु। नागोजिभट्टः महाभाष्यस्य प्रमाणमादाय सर्वत्र प्राचीनवैयाकरणमतानां भाष्यविरुद्धानां निराकुर्वन् भाष्यसम्मतान् सिद्धान्तान् पुनः स्थापयामास। किंवदन्त्यनुसारं नागेशोपाध्यायेन भाष्यम् अष्टादशकृत्वः

अधीतम् । अतः तत्रत्यगूढांशान् विज्ञाय तेन कैयटादीनां प्राचीनानां मतं निराकृतम् । अतः तेनापि भाष्ये सम्यक् अनुसन्धानं कृतमिति निश्चप्रचम् । अत एव सर्वत्र प्राचीनानाम् अपसिद्धान्तान् निराकृत्य अन्ते भाष्यप्रामाण्यमुपस्थापयति ।

**उपसंहारः**

षट्स्वङ्गेषु अपि शब्दसाधुत्वसाधनं शब्दार्थनिर्णायकं शास्त्रं व्याकरणं प्रधानं भवति । न केवलं भाषायाः साधुत्वसम्पादकमेव अपि तु वेदार्थनिर्णायकं शास्त्रं व्याकरणं भवति । तत्रापि दशसु व्याकरणेषु पाणिनीयं व्याकरणं सूत्र-वार्तिक-भाष्योपेतं, व्याख्योपव्याख्यया संवृद्धं, वैदिकसंस्कृतस्य तथा लौकिकसंस्कृतस्य च साधुत्वसम्पादकं संरक्षंकं च पाणिनीयं व्याकरणम्, नैकविधोपायैः भगवता पाणिनिना महता परिश्रमेण संरचितम् अत्यन्तं विशिष्टं महत्त्वपूर्णञ्च भवति ।

**उपयुक्तग्रन्थसूची**

1. **व्याकरणमहाभाष्यम्, चौखम्बा विद्याभवन, वारणासी ।**
2. **युधिष्ठर मीमांसक, व्याकरण शास्त्र का इतिहास, बहालगढ, सोनीपत ।**
3. **भट्टोजी दीक्षितः, वैयाकरण सिद्धान्त कौमुदी, चौखम्बा विद्याभवन, वारणासी ।**
4. **डा. कपिलदेव द्विवेदी, वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन, चौक, वारणासी ।**
5. **बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास, हिन्दू विश्वविद्यालय, वारणासी ।**
6. **डा. मङ्गलदेव शास्त्री, संस्कृत साहित्य का इतिहास, मोतीलाल बनारसीदास, वारणासी ।**